# श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्

## सत्रान्तपरीक्षा – एप्रिल् २०१९

| | | |
|---|---|---|
| **कक्षा**–शास्त्री-2(SEM-4) | **प्रश्नपत्रम्** – ८ (Old) | **गुणाः** – ७० |
| **विषयः** – पौरोहित्यम् | **कोड- CE- 248** | **समयः** – ३ तः ६ |
| **दिनाङ्कः** – ०८/०४/२०१९ | **सन्दर्भग्रन्थः**– संस्कारभास्करः । | |

---

**॥ प्रथमान्वितिः ॥** (Unit-1)

**प्रश्नः १ अधो लिखितेषु द्वयोः ससन्दर्भं व्याख्या कार्या ।** ०८

१ मुख्यो विवाहः पूर्वाह्णे मध्याह्ने चोत्तमोत्तमः । निशायां मध्यमः प्रोक्तः त्वपराह्णे तु गर्हितः ॥

२ बालवैधव्ययोगे तु कुम्भेन्दुप्रतिमादिभिः । कृत्वा लग्नं ततः पश्चात्कन्योद्वाह्येति चापरेति ॥

३ भूबाणनन्दहस्ताश्च रसदिग्वहितशैलजाः । वेदावसुशिवादित्यो घातचन्द्रो यथाक्रमम् ॥

**प्रश्नः २ विवाहमुहूर्तविचारः लेख्यः ।** ०८

अथवा

**विवाहप्रयोगं लिखत ।**

**प्रश्नः ३ अधोलिखितेषु द्वयोः टिप्पणीं लिखत ।** ०४

१ विवाहे ग्राह्यग्रहनिरूपणम् ।

२ लग्ने वर्ज्यग्रहाः ।

३ कन्यादानम् ।

४ वैधव्ययोगः ।

**प्रश्नः ४ अधोलिखितानां प्रश्नानाम् अतिलघूत्तरं लिखत ।** ०५

१ विवाहे गुरुः कदा शुभो भवति?

२ विवाहे विनायकशान्तिः किमर्थं क्रियते?

३ दिवाकाले विवाहः क्रियते चेत् तस्य किं फलम्?

४ विवाहे पूर्णाहुतिः भवति न वा?

५ ग्रन्थस्य भाष्यकारः कोऽस्ति?

६ पञ्चामृते के पदार्थाः?

७ स्त्रीघातचन्द्रः किम्?

**॥ द्वितीयान्वितिः ॥** (Unit-2)

**प्रश्नः ५ अधोलिखितेषु कयोश्चिद् द्वयोः ससन्दर्भं व्याख्या कार्या ।** ०८

१ नमस्ते सर्वलोकेश शतरश्मे तवोदयात् । यातु मे देव दौर्भाग्यं सौभाग्यं चास्तु मे सदा ॥

२ विरूपाय सुरूपाय नमस्ते ब्रह्मचारिणे । भक्तस्तुताय देवाय नमस्तुभ्यं विनायक ॥

३ नमस्ते यज्ञरूपाय वेदरूपाय ते नमः । नमोऽस्तु गणरूपाय गणानां पतये नमः ॥

**प्रश्नः ६ विवाहसंस्कारस्य महत्त्वं प्रतिपादयत ।** ०८

अथवा

**मृतभार्यायाः परिहारविषये लिखत ।**

**प्रश्नः ७ अधोलिखितेषु द्वयोः टिप्पणीं कुरुत । ०४**

१ कन्यावैधव्ये विष्णुप्रतिमादानम् ।

२ विनायकशान्तिः ।

३ वाग्दानप्रयोगः ।

४ मधुपर्कः ।

**प्रश्नः ८ अधोलिखितप्रश्नेषु पञ्चानाम् अतिलघूत्तरं लिखत । ०५**

१ गोदानं कदा कदा भवति?

२ स्वस्तिवाचने प्रधानदेवः कः?

३ दानानां कति प्रकाराः?

४ विवाहकर्मणि प्रथमं कस्य देवस्य पूजा भवति?

५ 'गोरुत्सर्गप्रयोगः' शब्दस्य अर्थः कः?

६ लाजाहोमः कदा भवति?

७ मधुपर्के के पदार्थाः भवन्ति?

॥ **तृतीयान्वितिः** ॥ (Unit-3)

**प्रश्नः ९ अधोलिखितेषु द्वयोः व्याख्या कार्या । ०८**

१ इयं दासी मया तुभ्यं श्रीवत्स प्रतिपादिता । सदा कर्मकरी भोग्या यथेष्टं भद्रमश्नुते ॥

२ सर्वमङ्गलमाङ्गल्ये शिवे सर्वार्थसाधिके । शरण्ये त्र्यम्बके गौरि नारायणि नमोऽस्तु ते ॥

३ गौरीं कन्यामिमां विप्र यथाशक्ति विभूषिताम् । गोत्राय शर्मणे तुभ्यं दत्तां विप्र समाश्रय ॥

**प्रश्नः १० कस्यचिदेकस्य वर्णनं कुरुत । ०८**

१ गौरीहरपूजाविधिः ।

२ वरस्य वधूगृहगमनम् ।

**प्रश्नः ११ एकस्य टिप्पणीं कुरुत । ०२**

१ घटियन्त्रप्रकारः ।

२ ब्राह्मणवरणम् ।

**प्रश्नः १२ द्वयोः अतिलघूत्तरं लिखत । ०२**

१ गोत्रोच्चारः केषां भवति?

२ षोडशसंस्काराः के?

३ मधुपर्केण किं प्राप्नोति?

४ माङ्गल्यसूत्रं कुत्र स्थापनीयम्?

०००